# शिशुपालवधमहाकाव्ये ज्योतिर्विज्ञानविचारः

**के.बी. अर्चकः**

**क्षेमेन्द्रः कविकण्ठाभरणे ज्योतिषशास्त्रज्ञावस्यावश्यकत्वं कवीनां प्रतिपादयति। तदनु लेखेऽस्मिन् माघस्य कवेः ज्योतिषशास्त्रज्ञानं तत्कृतेरुद्धरणानि प्रदर्श्य प्रकाश्यते।**

"अपारे काव्यसंसारे कविरेकः प्रजापतिः, यथास्मै रोचते विश्वं तथेदं परिवर्तते" (ध्वन्यालोक III. ४२) इति आनन्दवर्धनभणितिः अर्थवत्ता एव। सुकविः अचेतनानामपि चेतनवत् चेतनान् अचेतनवत् स्वतन्त्रतया काव्ये व्यवहारयति, काव्यप्रपञ्चं सृजति, नूतनब्रह्म भवति। इयं सृजनशक्तिः "कवेः अन्तर्गतभाव" इति भरतेनोक्तम्, एवं च कविप्रतिभा एवेति भामहेन अभिप्रेतम्।[१]

एतादृशसुकविनः अन्यतराणां शास्त्राणामपि सम्यक् ज्ञानमावश्यकं वर्तते। यथा राजा चक्रवर्तिपदप्राप्यर्थम् उत्तम–मध्यम–अधमजनमध्ये विवेकं मनसि विधायति, ब्राह्मणादि–वर्णानां तेषु तेषु वृत्तिषु अनिष्टसङ्करं परिहरति, तथैव श्रेष्ठकविः काव्यगतगुणान् मनसि निर्धार्य तद्दोषान् परिहृत्य उत्तमकाव्यं कर्तुं शक्नोति, अनेन च सः कविचक्रवर्ती भवितुं अर्हति। मार्गमिदमनुसृत्य व्यापकदृष्ट्या दण्डिः एवं कथयति

**नैसर्गी च प्रतिभा श्रुतं च बहु निर्मलम्।**
**अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः।।**

(काव्यादर्श. I. १०३)

तथा च, लोकानुभवं वेदादिशास्त्रज्ञानं वृद्धसेवा–विमर्शात्मकप्रतिभादिरूपं प्रकीर्णं च कवेरावश्यकं भवन्ति इति विश्वतोमुखविचारः "लोको विद्याप्रकीर्णं च काव्याङ्गानि" (१.३१) इति काव्यालङ्कारसूत्रेण प्रकटीकृतः। एतदग्रे गत्वा, क्षेमेन्द्रः कवेः शास्त्रज्ञान–व्यापकत्वमधिकृत्य स्वीये कविकण्ठाभरणे ख्यापयति–

**रवीन्दुताराकलनं सर्वर्तुपरिभावनम्।**
**जनसङ्घाभिगमनं देशभाषोपजीवनम्।।** (II. २)

अत्र 'रवीन्दुताराकलनम्' इति पदं कवेः ज्योतिषशास्त्रज्ञानस्यावश्यकत्वं सूचयति।

न केवलमिदं कवेः पर्याप्तं, अपि तु तस्य न्यायमीमांसा व्याकरणादिशास्त्र-ज्ञानमावश्यकम्। सन्दर्भेऽस्मिन् क्षेमेन्द्रः पतिपादयति यत् तर्क-व्याकरण-भरत-चाणक्य-वात्स्यायन-भारत-रामायण-मोक्षोपाय-आत्मज्ञान-धातुवाद- रत्नपरीक्षावैद्यकज्योतिष-धनुर्वेद-गज-तुरगपुरुषलक्षण-द्यूत-इन्द्रजालप्रकीर्णेषु परिचयः कविसाम्राज्यव्यञ्जनः इति।[२]

परमत्र कविना अवधातव्यं यत् विविधशास्त्रज्ञानप्रभावेन स्वकाव्ये यथेच्छं तत्त्च्छास्त्रविचारान् न व्यवहारयेत्। अंशमिमं लक्षीकृत्य अभिनवगुप्तेन निरूपितं यत्– "व्यत्पत्तिः प्रतिभोपयोगि समस्तवस्तु – पौर्वापर्यपरामर्शकौशलम्"। एतादृशकविचक्रवर्तिना माघेन स्वीये शिशुपालवधमहाकाव्ये नैकानां शास्त्रविषयाणां उल्लेखाः उपयोजिता सन्ति। यथा व्याकरण-शास्त्रं (II. ४७, ९५, ११२, XIV. ६६, XIX. ७५), धर्मशास्त्रं (IX. ९), सांख्यदर्शनं (I. ३३, XIV. १९), मन्त्रशास्त्रं (II. ८२), न्यायशास्त्रं (II. ९१), आयुर्वेदशास्त्रं (II. ५४, ८४, ९३, ९६), पुराणशास्त्रं (I. १५, ४९, ५० ; II. ३८, ३९, ४०, ६०; III. ६१; IV. २; V. ३१, ६६; VI. १७; VIII. ६४; IX. १४, ८०; XI. ३), नाट्यशास्त्रं (II. ४४, XIV. ४०), अर्थशास्त्रं (V. १०, ६०), गजशास्त्रं (V. ३६, ४७, ४९), संगीतशास्त्रं (I. १०; XI. १), इत्यादयः। तथैव माघकवेः राजनीतिज्ञानं पूर्णतया द्वितीयसर्गे परिचितं भवति। अत एव शास्त्रवैदग्ध्यं अमोघीकृतस्य कवेर्माघस्य नाम संस्कृतकाव्यसाहित्यनभोमण्डले विद्युदिव देदीप्यते। महाकाव्यलक्षणेक्षिते चन्द्रार्कोदयादि-वर्णनोत्तुङ्गतरङ्गान्विते प्रधानकथाप्रवाहे मज्जनानन्दभरभरिताः तस्य माघमहाकवेः ज्योतिर्विज्ञान-वैदुष्य-वैचित्र्यमपि साक्षीकुर्वन्ति। तथा च ज्योतिर्विज्ञानविचाराः यत्र यत्र यथायोग्य-स्वान्तरीभूताः सन्ति, तेषां समालोचनं ससन्दर्भमत्र कृतमस्ति।

शिशुपालवधमहाकाव्यस्य प्रथमसर्गे नारदः द्वारकामागत्य श्रीकृष्णं प्रति चेदिराजस्य औद्धत्यपूर्णस्य शिशुपालस्य संहारार्थं इन्द्रसन्देशं निवेदयति। एतस्मिन्नेव काले द्वितीयसर्गप्रारम्भे राजसूय-यागायोजितेन युधिष्टिरेण श्रीकृष्णः निमन्त्रितः भवति। अतः अनयोः देवकार्य-मित्रकार्ययोः कतरं स्वीकार्यमिति मानसिकद्वन्द्वमुपपाद्य, तन्निर्णयार्थं उद्धवबलरामाभ्यां सार्धं श्रीकृष्णः मन्त्रगृहमगच्छत्। गमनावसरे, तौ उद्धवबलरामाभ्यां कृष्णानुसरणं "गुरुकाव्यानुगां बिभ्रच्चान्द्रीमभिनभः श्रियम्" (II. २)[३] इति वर्णितम्। इदं च वर्णनं ज्योतिःशास्त्रोल्लेखेन उपोद्बलितमस्ति अमरकोशोक्तदिशा[४] अत्र गुरुकाव्यौ बृहस्पतिशुक्रयोः पर्यायवाचिनौ स्तः। सदसि

उद्धवबलरामाभ्यामनुसृतस्य श्रीकृष्णस्य शोभावैचित्र्यं उद्घोषयितुं माघेन नभोमण्डलमण्डितः गुरुशुक्रग्रहानुगतः चन्द्रः उपमानवाचकत्वेन उदाहृतः।

बृहज्जातकोक्तदिशा[५] स्वक्षेत्रस्थस्य चन्द्रस्य अपेक्षया यदा गुरुशुक्रौ समस्थानौ भवतः तदा गुरुशुक्रो सममित्रे अपि तयोस्तेजः ह्रासत्वं भजति। तथैव एकस्मिन्नेव मन्त्रगृहे स्थिताभ्यां उद्धवबलरामभ्यां तेजः चद्रिकास्मितस्य श्रीकृष्णस्य पुरतः कुण्ठितमभूत्, एवं च कृष्णवचनमेव अनुसरणीयं भवतीति भावः।

मन्त्रगृहे मन्त्रालोचनसमये 'शिशुपालबधाय पराक्रममवलम्ब्य युद्धं प्रवर्तयितव्यमि'ति बलरामेन गदितम्। "अग्नेः शेषं, ऋणात् शेषं, शत्रोः शेषं न शेषयेत्" इति न्यायेन क्षुद्रोऽयं शिशुपालः एकाकी सन् नः किं करिष्यतीति न कदापि उपेक्षणीयः, परं एकोऽपि शत्रुः शिशुपालः उच्छेत्तव्यः इति बलरामस्य अभिप्रायः सन्दर्भेऽस्मिन् पुराणप्रसिद्धं राहुणा चन्द्रग्रसनं उल्लिखितं यथा–

**ध्रियते यावदेकोऽपि रिपुस्तावत् कुतः सुखम्।**
**पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम्।।** (II. १८)

अत्रोक्तप्रकारेण सिंहिकापुत्रः राहुः एकोऽपि देवतानामग्र एव चन्द्रमसं ग्रसते। एतमेव चन्द्रग्रसनविषयं द्वितीयसर्गे एकोनपञ्चाशत्तमे श्लोके पञ्चदशसर्गे श्लोके च सुन्दरं व्याहृतम्। तथा चायं श्लोकः

**"स्वयं प्रणमतेऽल्पेऽपि परवायावुपेयुषि"।**
**निदर्शनमसाराणां लघुर्बहुतृणं नरः।।** (II. ५०)

अत्र बलरामोक्तरीत्या, यथा मन्देनापि वायुना तृणं स्वयमेव प्रह्वीभवति, तथैव निष्पौरुषपुरुषः अल्पीयसा रिपुणा लघुक्लेशेन तृणकल्पो भवति। एवं च रविराह्वोः चन्द्रराह्वोश्च योगयोर्मध्ये द्वितीयस्यैव योगः तीक्ष्णतर इति माघेन सूचितः यथा–

**तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत्।**
**हिमांशुमाशु ग्रसते तन्मदिम्नः स्फुटं फलम्।। ( II. ४९ )**

अत्र सूचितो विषयः एवं वर्तते, यदा रविराह्वोः योगः भवति तदा रवेः राहुः अल्पक्लेशकरः भवति, परं चन्द्रस्य अचिरेणैव कालेन बहुक्लेशकरः भवति। विषयस्यास्य स्पष्टीकरणं बिम्बात्मकेन ज्योतिःशास्त्रेण क्रियते यत् यस्य कस्यापि जातके चन्द्रः स्वस्थाने कर्कटके स्थितोऽपि राहुदुष्ट्याक्रुष्टो भूत्वा यथोचितफलदाने निर्बलो भवति, परं तादृशी निकृष्टावस्था रवेर्न भवति इति जातकमालायां स्पष्टं वर्तते।

एवं च पक्षकालमध्ये अष्टमी-चतुर्दशी-पूर्णिमा-प्रतिपत्तिथयश्च शुभं ज्ञापयन्ति इति तिथिनिर्णये प्रमाणितम्। अयमंशः पार्वणशब्दप्रयोगेन ध्वनितः माघेन यथा–

**जगत्पवित्रैरपि तं न पादैः स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः।**
**यतो बृहत्पार्वणचन्द्रचारु तस्यातपत्रं बिभराम्बभूवे।।** (III. २)

पूर्वोक्तप्रकारेण मित्रकार्य-देवकार्ययोः कः स्वीकारार्हः इति द्वन्द्वे उत्पन्ने सति कार्यद्वयं हस्तिनापुरगगनेन सम्भवति इति राजनीतिनिपुणस्य उद्धवमन्त्रिणः वचनानुसारं निर्णयं कृत्वा श्रीकृष्णः इन्द्रप्रस्थं प्रतस्थे। सन्दर्भेऽस्मिन् उपरितने श्लोके उक्तं यत्, कृष्णगमनसमये प्रपञ्चपूज्यं श्रीकृष्णं अर्कः स्वकिरणैः स्प्रष्टुं नार्हतीति।

तथा च इन्द्रप्रस्थप्रस्थानकाले 'पुष्य' नामकं माङ्गलिकरथमधिरोहतः श्रीकृष्णस्य शिशुपालवध-रूपकार्यसिद्धिर्भविष्यतीति सूचयता माघेन पठित :-

**रराज सम्पादकमिष्टसिद्धेः सर्वासु दिक्ष्वप्रतिषिद्धमार्गम्।**
**महारथः पुष्यरथं रथाङ्गी क्षिप्रं क्षपनाथ इवाधिरूढः।। ( III. २२ )**

अत्र 'पुष्य' इति शब्दप्रयोगेन पुष्यनक्षत्रं योजितम् भवति। बृहज्यातकोक्तरीत्या पुष्यनक्षत्रं सर्वार्थसाधकं वर्तते। यथोक्तं 'पुष्यो हस्तो मैत्रमप्याश्विनं च चत्वार्याहुः सर्वदिक् द्वारकाणि' इति। अपि च पुष्यनक्षत्रस्थितः चन्द्रः राजति काले क्रियमाणं कर्म सत्फलमाहवति, कर्मकर्तुः यशः सर्वासु दिक्षु प्रसरति इति नक्षत्रचूडामणौ व्याख्यातम्।

अनन्तरं नवमसर्गे वर्णितं यत् द्वारकानगरप्रस्थितः श्रीकृष्णः चतुरङ्गसङ्गो भूत्वा रैवतकपर्वतमासादितवान्। तत्र च श्लोकः सन्ध्यासमयं उपवर्णयति–

**प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।**
**अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्त्रमपि।। ( IX. ६ )**

दिवसावसानसमये सूर्यस्तावत् किरणसहस्त्रयुक्तोऽपि तेषां स्वकिरणानाम् अवष्टम्भनाय असमर्थो भवति, अस्तङ्गतो भवति। तदनन्तरं हिमांशु गगनाम्बरे उदयमेति। अतः सूर्यस्य कृते चन्द्रः प्रतिकूलः भवतीति सूचितम्। अत्र ज्योतिः-शास्त्रविचारः एवं वर्तते – चन्द्रः यथा यस्य पृष्ठतः (प्रतिकूलः) भवति, तदा सः महत्साधनसम्पत्तियुक्तोऽपि अनिष्टं भजति यथोक्तं जातकपारिजाते – " सम्मुखं ह्यर्थलाभाय दक्षिणे सुखसम्पदः। पृष्ठतो मरणं चैव वामे चन्द्रे धनक्षयः। प्रसङ्गान्तरे एकादशसर्गस्य श्लोकः ध्रुवनक्षत्रस्य आकृतिं कथयति–

**स्फुटतरमुपरिष्टादल्पमूर्तेर्ध्रुवस्य**
**स्फुरति सुरमुनीनां मण्डलं व्यस्तमेतत्।**
**शकटमिव महीयः शैशवे शार्ङ्गपाणे-**
**श्चपलचरणकाब्जप्रेरणोत्तुङ्गिताग्र्यम्।। ( XI. ३ )**

ध्रुवमण्डलं महत्तरं शकटमिव शकटाकारं शकटासुरशरीरमिव स्फुरति दीप्यत इति वर्णितमत्र। पृथिवीतः दूरे अवस्थानात् अस्य नक्षत्रस्य आकारः प्रतीयते। अस्य नक्षत्रस्य सन्दर्भः धर्मशास्त्रग्रन्थेषु स्मृतिग्रन्थेषु च श्रूयते। एवमेव धुरधुरायोगरय विचारः माघेन समीक्षितः अस्ति।

**पवनात्मजेन्द्रसुतमध्यवर्तिना नितरामरोचि रुचिरेण चक्रिणा।**
**दधतेन योगमुभयग्रहान्तरस्थितिकारितं धुरधुराख्यमिन्दुना।।**
**( XIII. २२ )**

बृहज्जातकोक्तरीत्या द्वितीयस्थाने गतेन द्वादशस्थानगतेन च चन्द्रेण सह कुज-बुध-गुरु-शुक्र-शनिग्रहेषु अन्यतरताराग्रहः विद्यते चेत् धुरधुरायोगः सम्भवति।[६] धुरधुरायोगस्य कारकाणां ग्रहभेदपञ्चकेन तेषां स्थानाधिपस्थितिभेदेन च अयं योगः अशीत्युत्तरशतभेदे भिन्नः वर्तते। अयं योगः कार्यसिद्धेः निदानमिति प्रमाणितम्।[७]

अपि च, त्रयोदशसर्गे श्रीकृष्णः युधिष्ठिरश्च तेजःपुञ्जेन समुल्लसन्त्यौ सभापुरतः रथादवतीर्णौ इति वर्णनसन्दर्भे माघः कथयति–

**अभितः सदोऽथ हरिपाण्डवौ रथादमलांशुमण्डलसमुल्लसत्तनू।**
**अवतेरतुर्नयननन्दनौ नभः शशिभार्गवावुदयपर्वतादिव।।**
**( XIII. ६१ )**

अत्र "शशिभार्गवावुदाय ....." इत्यादिवचनेन चन्द्रशुक्रयोः युगपत् समस्थाने कार्यसिद्धिर्भवतीति कविना उक्तम्। अस्मिन् विषये धुण्डिराजस्य जातकाभरणमेव प्रमाणम्।

तथा च पञ्चदशसर्गे अष्टचत्त्वारिंशत्तमे श्लोके "सकीलमिव सूर्यमण्डलम्. ...." इत्यादिवचनेन ज्योतिःशास्त्रविषयः ज्ञापितः भवति यत्, सूर्याचन्द्रमसौ परितः यदि नाम समुज्ज्वलतारकामण्डलं अवतिष्ठते तर्हि मनुष्याणां अमङ्गलं नूनं भवेत्।

एवं सेनानिवेशेन इन्द्रप्रस्थभूमिः उद्धृतधूलिधूसरितो समभवदिति वर्णनसमये माघः कथयति–

**यियासितामथ मधुभिद्विवस्वता जनो जरन्महिषविषणधूसराम्।**
**पुरः पतत्पतबलरेणु – नालिनीमलक्षयद्दिशमभिधूमितामिव।।**
**( XVII. ४१ )**

अत्र "अभिधूमितामिव" इति सूर्यगमनवैचित्र्यं व्यञ्जितं करोति। "अङ्गारिणी दिग् रविविप्रयुक्ता यस्यां रविस्तिष्ठति सा प्रदीप्ता। प्रधूमिता यास्यति यां दिनेशः शेषाः प्रशस्ताः शुभदाश्च ताः स्युः" इति जातकाभरणग्रन्थे विशदीकृतम्।।

एवमेव अन्येषु केषुचित् श्लोकेषु माघः ज्योतिःशास्त्रविचारान् आविष्कृत्य शिशुपालवधमहाकाव्यस्य वैचित्र्यं व्यञ्जितवानिति स्पष्टं भवति।

---

१. "काव्यं तु जायते कस्यचित् प्रतिभावतः प्रतिभावतः।।" काव्यलङ्कार, I. ५
२. कविकण्ठाभरणम्, V. २
३. सार्धमुद्धवसीरिभ्यामथासावासदत्सदः।
गुरुकाव्यानुगां विभ्रञ्चान्द्रीमभिनभः श्रियम्।। शिशुपालवधम्, II. २
४. "बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः
शुक्रो दैत्यगुरुः काव्यो उशना भार्गवः कविः", अमरसिंहः, अमरकोशः I. ५
५. वराहमिहिरः, बृहज्जातकम्, द्वितीयप्रकरणम्, १५, p. ९६
६. हित्वार्क सुनाफाऽनफाधुरधुराः स्वान्त्योभयस्थैः ग्रहैः शीतांशोः। बृहज्जातकम्, XIII. ३
७. उत्पन्नभोगसुखं भुग्धनवाहनाढ्यरतागान्वितो धुरधुराप्रभवरसुभृत्यः।। बृहज्जातकम्, XII. ६